प्रसृतस्तमिन्द्रियदेशमेव आत्मा पुनर्न प्रतिपद्यते । कदाचिद् व्यत्यासेनेन्द्रियमात्राः प्रवेशयति । तत आन्ध्यबाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखभिषक्कर्मता हास्यै देहाय भवति दुःखेन चिकित्सनीयोऽसौ भवतीत्यर्थः" भा०

**दुर्भृत्य** पु० दुष्टोऽसन् भृत्यः । भृत्यशब्दे वक्ष्यमाणभृत्यगुणविहीने निन्द्ये भृत्ये तत्स्वरूपं शुक्रनीतिशास्त्रपरिशिष्टे २अ० उक्तं यथा

"विपरीतगुणैरेभिर्भृतकोनिन्द्य उच्यते । ये भृत्या हीनभृतिका ये दण्डेन प्रकर्षिताः । शठाश्च कातरा लुब्धाः समक्षेऽप्रियवादिनः । मनोव्यसनिनश्चार्त्ता उत्कोचेष्टाश्च देविनः । नास्तिकादाम्भिकाश्चैव सत्यवाचोऽप्यसूयकाः । ये चापमानिता येऽसद्वाक्यैर्मर्मणि भेदिताः । रिपोर्मित्रसेवकाश्च पूर्ववैरानुबन्धिनः । चण्डाः साहसिका धर्महीना नैते सुसेवकाः । नीचो निवर्द्धितो राज्ञा राज्यनाशाय संभवेत् । वीर्याधिको नीचकुलो दुःसङ्गेन समेधितः । महाजनैः स्पर्द्धमानो हन्ति राष्ट्रं सराजकम् । सदर्थवदनर्थं तु सदर्थं त्वथनर्थवत् । कृत्वा स्वबुद्धिमाहात्म्यात् महान्तमपि निन्दति । वञ्चयित्वान्यसर्वस्वं विश्वासेनाहरत्यलम् । स नीचस्तद्गुणान् वक्तुं ब्रह्मापि खलु कातरः । संक्षेपतस्तु कथितं सदसद्भृत्यलक्षणम्" ।

**दुर्भ्रातृ** पु० दुष्टो भ्राता प्रा०स० । दुष्टे भ्रातरि "दुर्भ्रातुस्तस्य चोग्रस्य राजन् ! दुःशासनस्य च" भा०व० २७अ० तस्य भावः युवा० अण् । दौर्भ्रात्र तद्भावे न०

**दुर्मति** स्त्री दुष्टा मतिः । विवेकोत्पत्तिप्रतिबन्धकपापेन १मलिनबुद्धौ "निषीदन्नो अप दुर्मतिं जहि" यजु० ११। ४७। "देवीरपां मतिं दुर्मतिं बाधमानाः" १७।५४ दुःस्थिता मतिर्यस्य प्रा०ब० । २तद्युक्ते त्रि० "न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्" मनुः दुःस्था मतिरत्र प्रा०७त०। षष्टिवर्षमध्ये ३वत्सरभेदे "दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते । भवेद्वै मध्यमा वृष्टिर्दुर्मतौ ५५ समुपस्थिते" ज्योति०त० भवि०पु०

**दुर्मद** त्रि० दुष्कल्पितो मदो यस्य प्रा०ब०। उन्मत्ते "दुर्मदं गन्धर्वाप्सरोभ्यः" यजु० ३०।८। "कुमारान् क्रीडमानांस्तान् दृष्ट्वा राजा च दुर्मदान्" भा०आ० १२८अ०। २धृतराष्ट्रपुत्रभेदे "दुर्मदो दुःप्रधर्षश्च विवित्सुर्विकटाननः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

**दुर्मनस्** त्रि० दुष्टं मनः प्रा०स० । २दुष्टे मनसि "प्राप्य दुर्मनसा वीर ! गर्वेण च विशेषतः" रामा०अयो० ३१।२० दुःस्थितं मनोऽस्य प्रा०ब० । २दुःस्थितमनस्के ३व्याकुलचित्ते त्रि० "नापैति हृदयाद्राज्ञो दुर्मनाः स कथोऽभवत्" भा०आ०१६६ अ० ततो भृशा० च्व्यर्थे क्यङ् सलोपश्च दुर्मनायते । [तस्य नाम" ऋ०१०।१२।६।

**दुर्मन्तु** त्रि० दुर्+मन–तुन् । दुष्टं मन्यमाने "दुर्मन्त्वत्रास्त-

**दुर्मन्त्रित** त्रि० दुर्+मन्त्र–क्त । १दुष्टं मन्त्रिते मन्त्रणाविषये "त्वया दुर्मन्त्रितं द्यूतं सौबलेन च भारत !" भा०उ०१२७ अ० । भावे क्त । २दुष्टमन्त्रणायां न० पराभवो द्वैतवने य आसीत् दुर्मन्त्रिते घोषयात्रागतानाम्" भा०उ०११७अ०

**दुर्मन्त्रिन्** पु० दुष्टो मन्त्री प्रा० स० । मन्त्रिलक्षणगुणरहिते दुष्टे मन्त्रिणि । मन्त्रिलक्षणञ्च अमात्यशब्दे ३३१ पृ० उक्तम् । तद्वैपरीत्ये मन्त्रिणो दुष्टत्वम् । "सन्तापयन्ति कमपथ्यभुजं न रोगाः दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः" पञ्चत०

**दुर्मर** त्रि० दुष्टो मरो मृत्युः प्रा०स०। १दुष्टे मृत्यौ दुःखेन म्रियते दुर्+मृ–अच् । २श्वेतदूर्वायाम् स्त्री राजनि० । ३दूर्वायां स्त्री जटाध० दुःखेन मरो मरणं यस्य । ४दुःखेन मृत्युयुक्ते त्रि० "दुर्मरत्वमहं मन्ये नृणां कृच्छ्रेऽपि वर्त्तताम् । यत्र कर्णं हतं श्रुत्वा नात्यजत् जीवितं नृपः" भा०क०१अ० । ल्युट् । दुर्मरणमप्यत्र । मरणस्य दुष्टत्वं चण्डालादिहतत्वादिना भवति यथोक्तं नि० सि०

अङ्गिराः "चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् । उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते । नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति"। षट्त्रिंशन्मतेप्येवम् ब्राह्मेऽपि, "शृङ्गिदंष्ट्रिनखव्यालविषवह्निस्त्रियाजलैः"। व्यालो गजः । "सुदूरात्परिहर्तव्यः कुर्वन् क्रीडां मृतस्तु यः । नागानां विप्रियं कुर्वन् हतश्चाप्यथ विद्युता । निगृहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित् । परदारान् हरन्तश्च द्वेषात्तु पतिभिर्हताः । असमानैश्च सङ्कीर्णैश्चण्डालाद्यैश्च विग्रहम् । कृत्वा तैर्निहतास्तद्वच्चण्डालादीन् समाश्रिताः । शस्त्राग्निगरदाश्चैव पाखण्डाः क्रूरबुद्धयः । क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् । गिरिवृक्षप्रपातं च ये कुर्वन्ति नराधमाः । कुशिल्पजीविनो ये च सूनालङ्कारधारिणः । मुखे भगास्तु ये केचित् क्लीवप्राया नपुंसकाः । ब्रह्मदण्डहता ये च ये चापि ब्राह्मणै-